# Ribhuproktam Nityahomam Varnanam

# ઋભુપ્રોક્તં નિત્યહોમં વર્ણનમ્

## Document Information

Text title : Ribhuproktam Nityahomamvarnanam

File name : RRibhuproktaMnityahomaMvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 10 | 29-54||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં નિત્યહોમં વર્ણનમ્

(એવં હોમં સુદુર્લભમ્)
(ઋભુનિદાઘસંવાદે)
નિત્યહોમં પ્રવક્ષ્યામિ સર્વવેદેષુ દુર્લભમ્ ।
સર્વશાસ્ત્રાર્થમદ્વૈતં સાવધાનમનાઃ શ‍ૃણુ ॥ ૧૦.૨૮॥

- -

અહં બ્રહ્માસ્મિ શુદ્ધોઽસ્મિ નિત્યોઽસ્મિ પ્રભુરસ્મ્યહમ્ ।
ૐકારાર્થસ્વરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૨૯॥

પરમાત્મસ્વરૂપોઽસ્મિ પરાનન્દપરોઽસ્મ્યહમ્ ।
ચિદાનન્દસ્વરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૦॥

નિત્યાનન્દસ્વરૂપોઽસ્મિ નિષ્કલઙ્કમયો હ્યહમ્ ।
ચિદાકારસ્વરૂપોઽહં એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૧॥

ન હિ કિઞ્ચિત્સ્વરૂપોઽસ્મિ નાહમસ્મિ ન સોઽસ્મ્યહમ્ ।
નિર્વ્યાપારસ્વરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૨॥

નિરંશોઽસ્મિ નિરાભાસો ન મનો નેન્દ્રિયોઽસ્મ્યહમ્ ।
ન બુદ્ધિર્ન વિકલ્પોઽહં એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૩॥

ન દેહાદિસ્વારૂપોઽસ્મિ ત્રયાદિપરિવર્જિતઃ ।
ન જાગ્રત્સ્વપ્નરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૪॥

શ્રવણં મનનં નાસ્તિ નિદિધ્યાસનમેવ હિ ।
સ્વગતં ચ ન મે કિઞ્ચિદેવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૫॥

અસત્યં હિ મનઃસત્તા અસત્યં બુદ્ધિરૂપકમ્ ।
અહઙ્કારમસદ્વિદ્ધિ કાલત્રયમસત્ સદા ॥ ૧૦.૩૬॥

ગુણત્રયમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૭॥

શ્રુતં સર્વમસદ્વિદ્ધિ વેદં સર્વમસત્સદા ।
સર્વતત્ત્વમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૮॥

નાનારૂપમસદ્વિદ્ધિ નાનાવર્ણમસત્સદા ।
નાનાજાતિમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૯॥

શાસ્ત્રજ્ઞાનમસદ્વિદ્ધિ વેદજ્ઞાનં તપોઽપ્યસત્ ।
સર્વતીર્થમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૦॥

ગુરુશિષ્યમસદ્વિદ્ધિ ગુરોર્મન્ત્રમસત્તતઃ ।
યદ્દૃશ્યં તદસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૧॥

સર્વાન્ભોગાનસદ્વિદ્ધિ યચ્ચિન્ત્યં તદસત્સદા ।
યદ્દૃશ્યં તદસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૨॥

સર્વેન્દ્રિયમસદ્વિદ્ધિ સર્વમન્ત્રમસત્ત્વિતિ ।
સર્વપ્રાણાનસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૩॥

જીવં દેહમસદ્વિદ્ધિ પરે બ્રહ્મણિ નૈવ હિ ।
મયિ સર્વમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૪॥

દૃષ્ટં શ્રુતમસદ્વિદ્ધિ ઓતં પ્રોતમસન્મયિ ।
કાર્યાકાર્યમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૫॥

દૃષ્ટપ્રાપ્તિમસદ્વિદ્ધિ સન્તોષમસદેવ હિ ।
સર્વકર્માણ્યસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૬॥

સર્વાસર્વમસદ્વિદ્ધિ પૂર્ણાપૂર્ણમસત્પરે ।
સુખં દુઃખમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૭॥

યથાધર્મમસદ્વિદ્ધિ પુણ્યાપુણ્યમસત્સદા ।
લાભાલાભમસદ્વિદ્ધિ સદા (દાનં) દેહમસત્સદા ॥ ૧૦.૪૮॥

સદા જયમસદ્વિદ્ધિ સદા ગર્વમસત્સદા ।
મનોમયમસદ્વિદ્ધિ સંશયં નિશ્ચયં તથા ॥ ૧૦.૪૯॥

શબ્દં સર્વમસદ્વિદ્ધિ સ્પર્શં સર્વમસત્સદા ।
રૂપં સર્વમસદ્વિદ્ધિ રસં સર્વમસત્સદા ॥ ૧૦.૫૦॥

ગન્ધં સર્વમસદ્વિદ્ધિ જ્ઞાનં સર્વમસત્સદા ।
ભૂતં ભવ્યમસદ્વિદ્ધિ અસત્પ્રકૃતિરુચ્યતે ॥ ૧૦.૫૧॥

અસદેવ સદા સર્વમસદેવ ભવોદ્ભવમ્ ।
અસદેવ ગુણં સર્વં એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૫૨॥

શશશૃઙ્ગવદેવ ત્વં શશશૃઙ્ગવદસ્મ્યહમ્ ।
શશશૃઙ્ગવદેવેદં શશશૃઙ્ગવદન્તરમ્ ॥ ૧૦.૫૩॥

- -

ઇત્યેવમાત્મહોમાખ્યમુક્તં પ્રકરણં મયા ।
યઃ શૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૦.૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં નિત્યહોમંવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૦ । ૨૯-૫૪॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 10 . 29-54..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Nityahomam Varnanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*